# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** शास्त्री-**1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** धर्मशास्त्रम् | **प्रश्नपत्रम् - 5 - CC - 1.1.1** | समयः- 11:**30** तः **2:30** |
| **दिनाङ्कः-** 14/**10/2019** | **संदर्भग्रन्थः –** पाराशरस्मृतिः 1-6 | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भं भावार्थं लिखत। 10**

1. तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते।
   द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे।।
2. कृते तात्क्षणिकः शापस्त्रेतायां दशभिर्दिनैः।
   द्वापरे चैकमासेन कलौ संवत्सरेण तु।।
3. अभिगम्य कृतेदानं त्रेतास्वाहूय दीयते।
   द्वापरे याचमानाय सेवया दीयते कलौ।।

**प्र-2 एकस्य ग्रन्थोक्तदिशा सविस्तरेण लिखत। 10**

1. पाराशरकृतं चातुर्वर्ण्याचारान् वर्णयत।
2. द्वितीयाध्यायानुसारं सर्वेषां साधारणधर्मनिरूपणं क्रियताम्।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः ससन्दर्भं भावार्थं लिखत। 10**

1. भृग्वग्निमरणे चैव देशान्तरमृते तथा।
   बाले प्रेते च सन्यस्ते सद्यः शौचं विधीयते।।
2. शिल्पिनः कारुकावैद्या दासीदासाश्च नापीताः।
   राजानः श्रोत्रियाश्चैव सद्यः शौचाः प्रकीर्तिताः।।
3. द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ।
   परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः।।

**प्र-4 एकः सविस्तरेण लिखत। 10**

1. वर्तमानकाले पाराशरादिस्मृतीनां उपयोगिता प्रदर्शयतु।
2. क्षणध्वंसिनि कायेऽस्मिन् का चिन्ता मरणे रणे यथाग्रन्थं लिखत।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः ससन्दर्भं भावार्थं लिखत। 10**

1. वेदविद्याव्रतस्नातः शुनादष्टो द्विजो यदि।

स हिरण्योदकैः स्नात्वा घृतं प्राश्य विशुध्यति ।

2. पुनर्लेपनखातेन होमजप्येन शुध्यति ।
   आधारेण च विप्राणां भूमिदोषो न विद्यते ।।
3. तेषां वाक्योदकेनैव शुध्यन्तिमलिना जनाः ।
   ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः ।।

**प्र-6 एकः सविस्तरेण लिखत।** **10**

1. वस्त्र-पात्र-पदार्थानां शुद्धिः कया रीत्य भवति  यथाग्रन्थं वर्णयत।
2. मूषकं मार्जारं सर्पाऽजगरं तथा च कुरङ्गं वानरं सिंहं व्याघ्रं च घातयन् नरो कया रीत्या शुद्ध्यति  यथाग्रन्थं चर्चयत।

**प्र-7 दशानां लघुत्तराणि लिखत।** **10**

1. कति पुरुषार्थाः के के
2. कृष्णद्वैपायन व्यासस्य पितुः नाम किम्
3. कलौ शापादि कदा फलति
4. भूमिष्ठं नोदकम् कदा शुद्ध्यति
5. कस्मै सूतकं न भवति  पुनः यस्य चेच्छति तस्यापि न भवति सः कः
6. गर्भपातने कीदृशं फलं मिलति
7. मृते भर्तरि या नारी ब्रह्मचारिणी भवति तस्याः अन्ते का गतिः भवति
8. केषां वाक्योदकेन मलिनाः जनाः शुद्ध्यन्ति
9. शूद्रो कया रीत्या शुद्ध्यति
10. के जङ्गमतीर्थरूपाः
11. साधवः कीदृशाः
12. कः सर्वदेवमयो भवति
13. कुत्र स्थित्वा न भोजनीयम्
14. भोज्यं तत्क्षणात् पवित्रं कदा भवति
15. गायत्री शब्दस्य कोऽर्थः

******************